## ।। अथ चतुः षष्ठितमोऽध्यायः ।। Chapter-64

मांधातोवाच :- यदेतत् कथितं ब्रह्मन् तीर्थं पूर्वमनुत्तमम् ।।
वरुणेन तपस्तप्तुं स्वेच्छया ह्युषितं यत ।। १

यत्र स्वस्थले कुण्डे गौतमः समतानपाः ।।
सप्त्वा तपांसि तीर्थानि चकाराश्रमंत्मनः ।। २

तन्मे ब्रूहि यथातत्वं वरुणो यादसां पतिः ।।
तप्यमानो यथा प्राप[1] प्रतीचीप्रभुत्वं प्रभो ।। ३

वसिष्ठ उवाचः- पुरा तवः सुदुःपारं चिकीर्षु वरुणो नृप ।।
नृपञ्चकांङ्घ्रियुगाक्रान्तां नरवैश्च परिशोभिताम् ।। ४

नाना द्रुमलताकीर्णां नानापुष्पफलावृताम् ।।
भूमिं निरीक्ष्य वरुणास्तप्तुं समुद्यतः ।। ५

कृत्वा कापालिकं रौद्रमासनं नियतेन्द्रियः ।।
नेत्राभ्यां सूर्यमुत्पश्यन् वर्षाणि दश सस्थिवान् ।। ६

ततो धूर्धोमुखो भूत्वा धूमपान-परो नृप ।।
वर्षाणां विंशतिस्तस्थौ जपध्यानपरायणः ।। ७

-०-

१ वी नाप

सी ४ प्राप्य

तथापि नाभं ब्रह्मा प्रत्यक्षो लोककृत् प्रभुः
ततोंगुष्ठस्पृष्टभूमिर्दोर्ष्टं दत्त्वा दिवाकरे ।। ८

तस्थौ पंच सहस्त्राणि वर्षाणां काल शतानि च ।।
प्रत्यक्षो भूदयो राजन् ब्रह्मा लोकपितामह: ।। ९

स्वयं समुज्य पाणिभ्यां वरुणाय ददौ वरम् ।। १०

ब्रह्मोवाच:- ज्ञानामाधिपत्यं ते मया दत्तं तपोनिधे ।।
प्रतीची दिगियं दत्ता पश्चिमं प्राप्य सागरम्[1] ।। ११

स्थिति: कार्याति त्वया वत्स दिक्पालेन सता ध्रुवम् ।।
विभागस्तव यज्ञेषु मया दत्तो जलाधिप ।। १२

मन्त्रैर्वन्तमाहूय हविर्होष्यन्ति वाडवा: ।।
पुनर्ब्रूहि वरं वत्स यस्ते मनसि वर्तते ।। १३

अनेन तपसा तुष्टो दातास्मि भवतेऽनघ ।। १४

वरुण उवाच :- [3]दत्तमाशापतित्वं मे दुर्लभं यत् सुरैरपि [4] ।।
भगवन्मवता-कृत्वा दयां मयि तपस्विनि ।। १५

-0-

१ बी-प्रतीची दिगयं दत्ता स्थिति: कार्या त्वया ध्रुवम् ।।
२ बी-मन्त्रैर्मवन्तमाहूय यदि होष्यन्तिवाडवा: ।।
३ बी-वसिष्ठ उवाच
४ बी-दुर्लभम्
१ ए-भगवन्मवता

किन्त्वेतत्सिद्धिदं नृणां तीर्थमस्तु महीतले ॥
स्नानं करोति यो मर्त्यस्तीर्थेस्मिन् मम सिद्धये ॥ १६
तस्यास्तु वाञ्छिता सिद्धि[1]: प्रसादात्ते पितामह ॥ १७

पितामह उवाच :- ये त्र स्नानं करिष्यन्ति नरा: श्रद्धासमन्विता: ॥
तेषां भविष्यति प्राप्यो ब्रह्मलोको न संशय: ॥ १८

वरुणेन तपस्तप्त्वा प्राप्तमैश्वर्यमुत्तमम् ॥
वरुणां किलमेतद्धि तस्मात्तीर्थं भविष्यति ॥ १९

इत्युक्त्वा भगवान् ब्रह्मा ब्रह्मलोकं ततो गत: ॥
ततोम्बुपतिर्नदीशैस्तीर्थै: संयुत सर्वत: ॥ २०

अभिषिक्तो दिगीशत्वे वरुणो मुदितस्तदा ॥
एवमासीत् पुरा राजन् तीर्थं वरुण संज्ञितम् ॥ २१

गौतम्याश्रमं चक्रे तत्र तप्त्वा महत्तप: ॥
यत्र ब्रह्मा दर्वीदेवा[2]? स्वयं सर्वे तपोधना: ॥ २२

-०-

२९-दर्वी-देवा
१९-सिद्धि

दृष्टा स्नानाय गच्छन्ति सदा पर्वणि ।।
आरोग्यमिदमायुष्यं तीर्थमाहात्म्यमुत्तमम् ।। २३
श्रोतव्यं श्रावणीयं च नरैः[1] श्रद्धासमन्वितैः ।। २४

-०-

इति श्री स्कन्दपुराणे एकाशितिसाहस्त्र्यां संहितायां ब्राह्मविभागे उत्तरखंडे श्रीमाल माहात्म्ये वरुणातीर्थ महात्म्यन्नाम चतुः षष्ठितमोऽध्यायः ।। ६४ ।।

१ ए-नरैः